# <u>द्वितीया विभक्तिः - 5/10/2020</u>

## <u>बहुवचनप्रयोगाः</u>

<u>द्वितीयाविभक्ति बहुवचनप्रयोगाः</u> **<u>- dvitIyAvibhakti bahuvachanaprayogaaH (अकारान्तपुंलिङ्गः )</u>**

- रामः पाठं (<u>पाठः</u>) पठति । रामः पाठान् ( <u>पाठाः</u> ) पठति ।
- जनकः स्यूतं ( <u>स्यूतः</u> ) नयति । जनकः स्यूतान् (<u>स्यूताः</u> ) नयति ।
- आरक्षकः चोरम् (<u>चोरः</u>) अनुसरति । आरक्षकः चोरान् ( <u>चोराः</u>) अनुसरति ।
- छात्रः श्लोकं (<u>श्लोकः</u>) वदति । छात्रः श्लोकान् (<u>श्लोकाः</u> ) वदति ।
- रावणः हस्तं (<u>हस्तः</u>) प्रक्षालयति । रावणः हस्तान् (<u>हस्ताः</u>) प्रक्षालयति ।

रक्तवर्णपदानि द्वितीयाविभक्तिरुपाणि । कर्तरि प्रयोगे कर्मपदं द्वीतिया विभक्त्यन्तं भवति।

The words in red are in dvitIyAvibhaktiH| In active voice, the object (karmapadam) is declined in second case (vibhakti)

कर्तरि प्रयोगे क्रियापदं कर्तृपदम् अनुसरति । अतः कर्मदस्य वचनेन क्रियापदस्य किमपि परिवर्तनं न भवति ।

In active voice, the verb follows the subject. So there is no change in the verb when the number (vachanam) of the object.

---

<u>द्वितीया एकवचन-बहुवचनरुपाणि</u>
**<u>अकरान्तपुंलिङ्गः</u>**

पाठः -- पाठम् पाठाः -- पाठान्

स्यूतः -- स्यूतम् स्यूताः -- स्यूतान्

चोरः --- चोराः चोराः -- चोरान्

श्लोकः -- श्लोकम्  श्लोकाः -- श्लोकान्

हस्तः -- हस्तम्  हस्ताः --- हस्तान्

द्वितीयाविभक्ति बहुवचनप्रयोगाः - (आकारन्तः स्त्रीलिङ्गः )

अरुणः लतां (लता) पश्यति | अरुणः लताः (लताः) पश्यति |

सुमना पत्रिकां (पत्रिका ) स्वीकरोति | सुमना पत्रिकाः (पत्रिका) स्वीकरोति |

सरस्वती छात्रां (छात्रा) अनुगृह्णाति | सरस्वती छात्राः (छात्राः) अनुगृह्णाति |

अहं कपाटिकाम् (कपाटिका) उद्घाटयामि | अहं कपाटिकाः (कपाटिकाः) उद्घाटयामि |

मित्रं मालां (मालः ) क्रीणाति | मित्रं मालाः (मालाः) क्रीणाति |

रक्तवर्णपदानि द्वितीयाविभक्तिरुपाणि | कर्तरि प्रयोगे कर्मपदं द्वीतिया विभक्त्यन्तं भवति।

कर्तरि प्रयोगे क्रियापदं कर्तृपदम् अनुसरति | अतः कर्मदस्य वचनेन क्रियापदस्य किमपि परिवर्तनं न भवति |

**आकारन्तस्त्रीलिङ्गः**

लता --- लताम्  लताः --- लताः
पत्रिका --- पत्रिकाम्  पत्रिकाः --- पत्रिकाः

छात्रा --- छात्राम्  छात्राः --- छात्राः

कपाटिका --- कपाटिकाम्  कपाटिकाः --- कपाटिकाः
माला ---- मालाम्  मालाः ---- मालाः

---

द्वितीयाविभक्ति बहुवचनप्रयोगाः - ( ईकारान्तस्त्रीलिङ्गः)

कुमारः लेखनीं (लेखनी) स्वीकरोति | कुमारः लेखनीः (लेखन्यः ) स्वीकरोति |

पुष्पा पार्वतीं (पार्वती ) पश्यति | पुष्पा पार्वतीः (पार्वत्यः ) पश्यति |

सुमती तर्जनीं (तर्जनी) दर्शयति | सुमती तर्जनीः (तर्जन्यः) दर्शयति |

भवान् नदीं (नदी ) तरति | भवान् नदीः (नद्यः ) तरति |

अहं नारीं (नारी) पृच्छामि | अहं नारीः (नारीः) पृच्छामि |

रक्तवर्णपदानि द्वितीयाविभक्तिरुपाणि | कर्तरि प्रयोगे कर्मपदं द्वीतिया विभक्त्यन्तं भवति।

कर्तरि प्रयोगे क्रियापदं कर्तृपदम् अनुसरति | अतः कर्मदस्य वचनेन क्रियापदस्य किमपि परिवर्तनं न भवति |

*********************************************************************

**ईकारान्तस्त्रीलिङ्गः**

लेखनी - लेखनीम् लेखन्यः - लेखनीः

पार्वती - पार्वतीम् पार्वत्यः - पार्वतीः

तर्जनी - तर्जनीम् तर्जन्यः - तर्जनीः

नदी - नदीम् नद्यः - नदीः

नारी - नारीम् नार्यः - नारीः

---

द्वितीयाविभक्ति बहुवचनप्रयोगाः **- (नपुंसकलिङ्गः)**

कृष्णः पत्रं (पत्रं) लिखति | कृष्णः पत्राणि (पत्राणि ) लिखति |

राधा पात्रं (पात्रं) प्रक्षालयति | राधा पात्राणि (पात्राणि ) प्रक्षालयति |

ऊर्वशी पर्णं (पर्णं ) पातयति | उर्वशी पर्णानि (पर्णानि) पातयति |

भवती पुस्तकं (पुस्तकं) पठति | भवती पुस्तकानि (पुस्तकानि) पठति |

अहं चित्रं (चित्रं) पश्यामि | अहं चित्राणि (चित्राणि) पश्यामि |

रक्तवर्णपदानि द्वितीयाविभक्तिरुपाणि | कर्तरि प्रयोगे कर्मपदं द्वीतिया विभक्त्यन्तं भवति।

कर्तरि प्रयोगे क्रियापदं कर्तृपदम् अनुसरति | अतः कर्मदस्य वचनेन क्रियापदस्य किमपि परिवर्तनं न भवति |

**<u>अकारान्त नपुंसकलिङ्गः</u>**

पत्रम् -- पत्रम् पत्राणि -- पत्राणि
पात्रम् -- पात्रम् पात्राणि -- पात्राणि
पर्णम् -- पर्णम् पर्णानि -- पर्णानि
पुस्तकम् -- पुस्तकम् पुस्तकानि -- पुस्तकानि
चित्रम् -- चित्रम् चित्राणि -- चित्राणि

नपुंसकलिङ्गे प्रथमा द्वितीया विभक्ति रूपाणि समानानि इति जानन्तु |

Observe that the first and second cases are same for a neutral gender word.

--------------------------------------------------------------------------------